AD EDUXIAN JOURNAL
A Quarterly Multidisciplinary Blind Peer Reviewed & Refereed, Open Acces & Google Scholar Indexed International E- Journal
Vol (1&2), Issue (3), Nov -Jan 2024-25 E-ISSN: 3048-7951

# उपनिषदां सूत्रतुल्यत्वम् उपदेशभङ्गिभेदश्च

डॉ. सञ्जीव सरकार
सहायकाचार्यः,संस्कृतविभागः,
ओडिशा केन्द्रीयविश्वविद्यालयः, कोरापुटम्

**अब्स्त्रच्त:**

उप+नि-उपसर्गपूर्वकस्य विशरणगत्यवसादनार्थकस्य 'षदलृ' धातोः क्विबन्तस्य रूपमिदमुपनिषदिति। 'उप' शब्दो हि समीप्यमाह, 'नि' शब्दश्च निश्चयार्थः। गुरोः समीपं स्थित्वा श्रद्धापूर्वकं प्राप्यमानं गुप्तज्ञानमेव 'उपनिषद्' इति। "सेयं ब्रह्मविद्या उपनिषच्छव्द्वाच्या, तदपराणां सहेतोः संसारस्यात्यन्तावसादनात्। उप-नि-पूर्वस्य सदेस्तदर्थत्वात्, तादर्थ्याद, ग्रन्थोऽपि उपनिषदुच्यते"- श्रीमत्शङ्करभगवत्पादैः। उपनिषत्प्रस्थानं नाम वेदान्तः। प्रस्थानं नाम प्रस्थीयतेऽनेनेति प्रस्थानं मार्गः। प्रस्थानत्रय्यां प्रमुखा तथा प्रधानैवोपनिषद्। "त्वं त्वौपनिषदं पुरुषं पृच्छामि" इति श्रुत्यनुसारेण। यद्यपि सूत्रकारैः भाष्यकारैः वा न कुत्रापि प्रस्थानशब्देन व्यवहृतम् तथापि वेदान्तशास्त्रनिबन्धकारैः व्यवहृतम्। एवमेव सूत्रप्रस्थानं गीताप्रस्थानमिति भण्यते। संस्कृतवाङमयं द्विविधं लौकिकं वैदिकञ्चेति। वैदिकसाहित्ये संहिता-ब्राह्मणरण्यकोपनिषदः स्मरन्ति मनीषिणः।'उपनिषत्' वैदिकवाङमयान्तर्गता। वेदस्य अंशद्वयं मन्त्रो ब्राह्मणञ्चेति। मन्त्रभागः संहिताभागनाम्नाऽपि सम्बोध्यते। प्रायशो मन्त्राः पद्ये ब्राह्मणानि गद्ये सन्ति। विशेषतो यज्ञादीनां विधिः ब्राह्मणे समुपवर्णितोऽस्ति। ब्राह्मणभागस्यारण्यको भाग आरण्यक नाम्ना प्रथते। आरण्यकेषु एकान्तस्थाने स्थित्वा जगद्रहस्यविषये निगूढतरं चिन्तनं उपलभ्यते। तथा हि यागादिप्रतिपादकेभ्यो विधिनिषेधरूपेभ्यो विचारेभ्यो निवृत्तिस्तया च दार्शनिकचिन्तनेषु प्रवृत्तिः प्रदर्शिता लक्ष्यते। अन्तिमो भागराशिः उपनिषदस्ति। यस्यां हि वैदिकदर्शनसारतत्वं संग्रहितमस्ति। ब्राह्मणस्य (विधायकं वाक्यं ब्राह्मणम्) पूर्वभागो मन्त्रभागश्च कर्मकाण्डप्रधानौ स्तः। अन्तिमो भागस्तु (उपनिषद्) ज्ञानकाण्ड इति स्वीक्रियते। अर्थात् कर्मभावनया ब्राह्मणग्रन्थानां ज्ञानभावनया चोपनिषदां विभागो जातः। कर्मकाण्डप्रधानेषु ब्राह्मणग्रन्थेषु विहितान् पशुहिंसादीन् प्रति विचारवतां मनीषिणां हृदये कर्मकाण्डं प्रति किलाविश्वासो जागर्ति स्म। कर्मकाण्डस्य विरोध एव ज्ञानकाण्ड स्याभ्युदयो जातः यत्प्रतिपादका ग्रन्था उपनिषदः

**मुख्यवक्त्रम्:** उपनिषदां सूत्रतुल्यत्वम् उपदेशभङ्गिभेदश्च

**उपनिषदांसूत्रतुल्यत्वम्**

यद्यपि ब्रह्मसूत्राणामेव सूत्रशब्देन व्यवहारः तथापि उपनिषदः सूत्रवत् संक्षिप्ताक्षराः भवन्ति । परन्तु न केवलं सूत्रतुल्याः क्वचित् सूत्रविवरणवत् व्याख्यारूपाश्च दृश्यन्ते।

**"सूत्रार्थोवर्ण्यतेयत्रपद्यैःसूत्रानुकारिभिः।**

**स्वपदानिचवर्ण्यतेभाष्यंभाष्यविदोविदुः॥" इति**

एतद् भाष्यलक्ष्यणं संगच्छत एव सूत्रभाष्यवत् उपनिषद् एव गीताया अपि अल्पाक्षरत्वात् सूत्रात्मकत्वम्। अतः किं उपनिषदः मन्त्रब्राह्मणात्मिकाश्च दृश्यन्ते। यतो मन्त्रः सूत्रवत् संक्षिप्तरूपः, ब्राह्मणस्तु व्याख्यारूपः इति। यथा – "ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति"[1] इति। अत्र भाष्यकाराः 'ब्रह्मविदाप्नोति परम्, इति वाक्यं सूत्रभूतं सर्वस्य वल्ल्यर्थस्य एवं तदेषाभ्युक्तेति तस्मिन्नेव ब्राह्मणवाक्योक्तेऽर्थे एका ऋक् उभ्युक्ता इति। यथा तैत्तिरीये एव 'तदप्येष श्लोको भवति[1] इति आम्रेडितो ब्राह्मणेन विस्तरेणोक्तेऽर्थे श्लोको मन्त्रः संक्षेपेण बोधको भवति। यथा आनन्दवल्ल्याम् तदप्येष श्लोको भवति, अन्नाद्वै प्रजाः प्रजायन्त[2] इति। द्वितीयानुवाक्ये तेत्तिरीयोपनिषदि आनन्दवल्ल्याम् तथा – तदप्येष श्लोको भवति प्राण देवा अनुप्राणन्ति [1]इत्यादि। एवमेव पञ्चकोशविवरणस्थले उत्तरत्र मन्त्राः श्लोकशब्देन प्रदर्शिताः। अनुरूपमेव आनन्दवल्ली परिसमाप्ता मन्त्रब्राह्मणरूपेण।

मुण्डकप्रश्नोपनिषदौ तु सुप्रसिद्धे मन्त्रब्राह्मणरूपेण। तत्र मुण्डकं मन्त्ररूपम्, एवं प्रश्नस्तु ब्राह्मणरूपः[3] इत्यभिधीयते। परन्तु बृहदारण्यकं (शुक्लयजुःशाखा) केवलं मन्त्ररूपं इति ज्ञायते। भाष्यकारैः बृहदारण्यकान्ते तानीमानि शुक्लानि ब्राह्मणेनाव्यामिश्राणि[1] इति व्याख्यातम्। तत्र 'तानि इमानि' इति यजूंषि उच्यन्ते। कृष्णयजुर्वेदस्तु ब्राह्मणमिश्रमन्त्रात्मकः। तद्धेतोः तैतिरीयोपनिषत् तथा लक्ष्यते।

परन्तु शुक्लकृष्णयजुर्भेदे प्रदर्शितेऽपि बृहदारण्यके क्वचित्कचित् मन्त्रब्राह्मणात्मकत्वमपि सूत्रव्याख्यानरूपेण दृश्यत एव, यथा – बृहदारण्यके चतुर्थब्राह्मणे – "तदेतदृचाऽभ्युक्तम् - एष नित्यो महिमा ब्राह्मणस्य। न वर्धते कर्मणा.पापकेन। इति। अत्र भाष्यम् – "तदेतद्वस्तु ब्राह्मणेनोक्तं ऋचा

---

[1] तै. उप 2-1

[2] तै. उप 2-2

[3] मन्त्रोक्तार्थस्य विस्तरानुवादीद ब्राह्मणमारभ्यते इति।

मन्त्रेण अभ्युक्तं प्रकाशितं भवति[4], इति। अन्यत्र च तदप्येष श्लोको भवति। तदेव सक्तः सह कर्मणेति[1] इति। तदप्येष श्लोको भवति। यदा सर्वे प्रमुच्यन्ते[5] इत्यादि। अत्रापि भाष्यम् – अत्रापि मोक्षो मोक्षसाधनं च ब्राह्मणेनोक्तं तस्यैव दृढीकरणाय मन्त्र उदाह्रियते श्लोकशब्दवाच्य इति। तदेते श्लोका भवन्ति[1], इति **मन्त्रब्राह्मणोक्ते** आत्मकामस्य ब्रह्मविदो मोक्ष इत्यस्मिन्नर्थे विस्तरप्रतिपादका एते श्लोका भवन्ति – "अणुः पन्था वितत" इत्यादिना चतुर्दशमन्त्रा इति। तथापि बाहुल्येन ब्राह्मणामिश्रितत्वात् शुक्लयजुः शब्देन व्यवहारः। एवमेव सर्वा उपनिषदः सूत्रव्याख्यानरूपाः द्रष्टव्याः।

**उपनिषदांउपदेशभङ्गिभेदः**

प्रख्याता उपनिषदः आधिक्येन आख्यायिकात्मिकाः दरीदृश्यन्ते। यतो आख्यायिकारूपेण ज्ञातव्योददेशस्तु दुर्विज्ञेयतत्त्वाधिगमसौलभ्यकल्पनमेव। सुतरां भाष्यकाराः 'यदस्ति तद्विज्ञातं प्रमाणैः, यन्नास्ति तदविज्ञानं शशविषाणकल्पमसदृष्टम्, तथेदं ब्रह्माविज्ञातत्वादसदेवेति मन्दबुद्धीनां व्यामोहो माभूदिति आख्यायिकारभ्यत[6] इत्याहुः। छान्दोग्ये चतुर्थे आख्यायिकायाः प्रयोजनान्तरमुक्तं विद्यादानग्रहणविधिप्रदर्शनार्था च इति। श्रद्धान्नदानानुद्धतत्त्वादीनां च विद्याप्राप्तिसाधनत्वप्रदर्शयत आख्यायिका – 'जानश्रुतिरिह पौत्रायण'[1] इत्यादीना।

क्वचित् आख्यायिका परविद्यास्तुत्यर्था यथा – छान्दोग्ये भाष्यकाराः – 'कथं नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन् अनात्मज्ञात्वाच्छुशोच इव ? किमु व्यक्तव्यम् अन्योऽल्पविज्जन्तुरकृतपुण्यातिशयोऽकृतार्थ इति। अथवा नान्यदात्मज्ञानान्निरतिशयश्रेयः – साधनमस्तीति प्रदर्शनार्थं सनदकुमारनारदाख्यायिका आरभ्यत' इति।

क्वचिद्विद्यासंप्रदानन्यायप्रदर्शनार्था आख्यायिका यथा प्राचीनशाल औपमन्यव इत्यादिरूपा। तत्र तृतीयखण्डे वैराग्यहेतोः मुमुक्षुणां संसारगतयो वक्तव्या इत्याख्यायिका आरभ्यत इति। एवमेव यथा केनोपनिषदि यक्षरूपधारिणः परब्रह्मणः आख्यायिका, उमायाः उपदेशः प्राप्यते। कठोपनिषदि नचिकेतोपाख्यानम् अतीव प्रसिद्धमस्ति।

एवं स्थितेऽपि सुखावबोधार्थं आख्यायिकाशैलीं उपनिषदि गृह्णाति इत्यत्र भाष्यकाराणामधिकं तात्पर्यम्। एवं सुखावबोधनाय काव्यशैलीमप्यनुकरोति। यथा –

---

4 बृ. भा. 4-4-23

5 बृ. भा. 4-4-7

6 केनो. उप. शां. भा

**"सूर्योयथासर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः।**
**एकस्तथासर्वभूतान्तरात्मानलिप्यतेलोकदुःखेनबाह्यः"॥**[7]

अर्थात् यथा समग्रस्य लोकस्य चक्षुः सूर्यः समग्रं लोकं प्रकाशयति, स्वयं नेत्र सम्बन्धितैः बाह्यैः लिप्तो न भवति, तथैव सर्वभूतान्तरात्मा सांसारिकैः दुखैः लिप्तो न भवति। अतः एकस्य सर्वात्मत्वेऽपि संसारदुः खित्वस्य असम्बन्धप्रदर्शनाय सूर्यस्य दृष्टान्ततयोपादनम्। एवमेव वायोः, अग्नेः दृष्टान्ततया ग्रहणम्।

**"वायुर्यथाभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव।**
**एकस्तथासर्वभूतान्तरात्मारूपंरूपंप्रतिरूपोबहिश्च॥"**[1]

अर्थात् स आत्मा एव सर्वेषां हृदयेषु स्थितः सन् एकं रूपं बहुधा अर्थात् बहुषु रूपेषु प्रतीतो भवति। अतः एकस्यैवात्मनः समस्तभूतान्तरात्मनः प्रतिदेहमुपाधिभेदेन बहुविधत्वे स्वरूपतोऽविकृतत्वे चेति।

"छायातपौ ब्रह्मविदो वदन्ति...."।[8] जीवात्मपरमात्मनोः नित्यः स्वरूपसम्बन्धः, इमौ परस्परं छायातपौ इव सम्बद्धौ स्तः ।

"ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः...."।[1]पूर्ववदियं श्रुतिः उपमालंकारघटितमर्यादा दुर्विज्ञेयार्थबोधार्थं गृह्यते। "पुरमेकादशद्वारमजास्यावक्रचेतसः...''।[9] "अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः.."[1] । इत्यादयः।

**"आत्मानंरथिनंविद्धि, शरीरंरथमेवतु।**
**वुद्धिंतुसारथिंविद्धिमनःप्रगृहममेवच॥"**[10]

यमोपदेशस्य शरीररथरूपकनिरूपणं सर्वत्रप्रख्यातमस्ति। यमः रूपकद्वारा विषयमिमं स्पष्टमकरोत् – आत्मा रथी अस्ति 'आत्मानं रथिनं विद्धि, शरीरं रथः, बुद्धिः सारथिः, इन्द्रियाणि अश्वाः, मनः प्रग्रहः, शब्द-स्पर्शादयो विषयाः सन्ति।

मुण्डकोपनिषदि यथा -

**"द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते।**
**तयोरन्यःपिप्पलंस्वाद्वत्तिअनश्नन्नन्योऽभिचाकशीति॥"**[1]

---

[7]2/2/11 क.उप.

[8]1/1/3 क.उप.

[9]2/2/1 क.उप.

[10]1/3/3 क.उप.

AD EDUXIAN JOURNAL
A Quarterly Multidisciplinary Blind Peer Reviewed & Refereed, Open Acces & Google Scholar Indexed International E- Journal
Vol (1&2), Issue (3), Nov -Jan 2024-25 E-ISSN: 3048-7951

इत्यत्र जीवपरमेश्वरबोधने रूपकातिशयोक्तिरूपालङ्कारमर्यादया सुपर्णतादात्म्याध्यवसायेन श्रुतिः प्रवृत्ता। उपमेययोः जीवपरमेश्वरयोः सुपर्णपदेन निगीयाध्यवसानलक्षणया ग्रहणम्। पिप्पलपदेनापि तथैव कर्मफलस्य, समानवृक्षपदेन शरीरस्य तदाश्रयस्य च ग्रहणम्।

**"सप्तप्राणाःप्रभवन्तितस्मात्सप्तार्चिषःसमिधःसप्तहोमाः।**
**सप्तइमेलोकाःयेषुचरन्तिगुहाशयानिहिताःसप्तसप्त...."**[11]

इत्यत्र रूपकातिशयोक्तिविधयाऽर्चिष्पदेन स्वविषयावद्योतनानि समित्पदेन समिन्धन-सादृश्यात्सप्तविषयाः, लोकपदेन इन्द्रियस्थानानि साध्यवसानलक्ष्यणया गृह्यन्ते।

छान्द्योग्योपनिषदि यथा –

"लवणमेतदुदकेऽवधाय..."[1] यदि जगतो मूलं सत् कस्मान्नोपलभ्यत इत्यत्र लवणदृष्टान्तः। तत्रोदकविलीनं लवणं यथा चक्षुषा न गृह्यते, रसनया तु गृह्यते, तद्वत् सदब्रह्मापि प्रत्यक्षतोऽगृहीतमपि संस्कृतबुद्धया गृह्यत इति बोधितम्।

एवं "यथा सौम्य मधु मधुकृतो निस्तिष्टन्ति...."[12] इत्यत्र मधुत्वेन एकतां गताः विविधपुष्परसा उपमानत्वेम गृहीताः।

स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते...."[1] इत्यत्र जीवानां जाग्रत्स्वप्नयोः परिभ्रमणेन श्रान्तानां विश्रान्तिस्थानं परमात्मा सुषुप्तस्थ अत्र शकुनिदृष्टान्त उपात्तः। तत्र शकुनेः विश्रान्तिस्थानं बन्धनमायतनमुपमानतया गृहीतम्। इत्येते मन्त्राः उपमालङ्कारविधया बोधयन्ति।

बृहदारण्यकोपनिषदि तथा –

**"पुरश्चक्रेद्विपदःपुरश्चक्रेचतुष्पदः।**
**पुरःसपक्षीभूत्वापुरःपुरुषआविशत्।।"इतिश्रुयते**[13]

अत्र रूपकरूपकातिशयोक्तिविधयाऽलङ्कारविधया पुर इति शब्देन शरीरं, पक्षिशब्देन लिङ्गशरीरं विविक्षित्वा परमात्मनः सर्वशरीरप्रवेशं तदेकत्वं च बोधयति।

---

[11] 2/1/18 मु.उप.

[12] 6/9/1 छा.उप.

[13] पुरः शब्देन पक्षिश्बदेन च परमात्मानं प्रविष्टजीवात्मानं चाह। बृ. उप 2/5/18

एवमेव चतुर्थब्राह्मणे – "तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रम्य आत्मान मुपसंहरति"[1] इत्यादिना जीवस्य देहान्तरं प्रति गमने, भावनया भाविदेहं गृहीत्वैव प्राक्तनं देहमुपसंहरतीति विषये तृणजलायुकामुपमानीकृत्य बोधयितुं प्रवृत्ता।

तत्रैव उत्तरत्र "तद्यथा अहिनिर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीत। एवमेवेदं शरीरं शेते"[14] इति मन्त्रः मुक्तात्मविषये वल्मीके सर्पपरित्यक्तनिर्मोकमुपमानीकृत्य देहे सर्वात्मना निरभिमानतां बोधयति।

एवमेव सर्वासूपनिषत्सु काव्यमर्यादया तत्तबोधनभङ्गिः स्वीकरणीया। अन्याऽपि भङ्गिर्वादजल्पवितण्डकथारूपेणापि बोधनविषयिणी दृश्यते[1]। अन्यत्र च प्रायेणोपक्रमे एकत्वप्रतिज्ञां, तत्समर्थनदृष्टान्तहेतून्यासौ ब्रह्मविकारांशादिरूपेण जगतो दर्शनं पुनरेकत्वोपसंहारं च पश्यामः। अतः प्रतिज्ञा हेतू दाहरणोपनय निगमन रूप पञ्चा वयवन्याय वाक्य प्रयोग रूप परार्थानुमान शैलीं तत्त्वबुभुत्सं प्रति श्रुतिरनुरुन्धे।

तद्यथा छान्दोग्योपनिषदि – "येनाश्रुतं श्रुतं भवति, अमतं मतमविज्ञातं विज्ञात"[15] इति प्रतिज्ञा। "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[1] इत्यादिदृष्टान्तः। "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"[16] इत्यप्येका प्रतिज्ञा। तत्समर्थनाय "तदैक्षत बहु स्यां प्रजायेयेति"[1] इत्यादिवाक्यं भूतोत्पत्तिपरं प्रवृत्तम्। "स य एषोऽणिमैतदात्म्यमिदं सर्वं"[17] मित्युपसंहारः।

**सहायक ग्रन्थ सूची**

1. अभेदान्द भट्टाचार्यः – परिमल प्रकाशन – दिल्ली-1964.
2. उपनिषदः एक परिचयः – वेम्पटि कुटुम्बशास्त्री, प्र.संस्करणम्-1995.
3. उपनिषत्सु कर्मवादः, जातवेद त्रिपाटी, प्र.सं, दिल्ली, 1986.
4. उपनिषद्भाष्यम् – खण्डः 1—एस. सुब्रह्मणमय्शास्त्री, महेश अनुसन्धानम् – वाराणसी.
5. दशोपनिषद् – शाङ्करभाष्य – मोतिलालवनार्जीदासः – दिल्ली – 1964.
6. श्रीमद्भागवद्गीता शाङ्करभाष्यम् – व्यासदेवः – गीताप्रेस, गोरखपुर – 1982

14 4/4/7 बृ. उप

15 6/1/3 छा. उप

16 6/2/1 छा. उप

17. 6/8/7 छा. उप